**PAPER - 2**

# MT

**2017 .... .... 1200**

**Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - II**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत यतः ........... ।

(उपचारार्थं धनव्ययः नाभवत् । / स्वास्थ्यरक्षणस्य रहस्यं तेन ज्ञातम् ।)

II) कः कं वदति ? १

भवतः उपचाराः प्रारब्धाः एव ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

विविधकार्यव्यग्राः स्वास्थ्यम् अनुभवन्ति ।

सुहास्यवदनः अनन्तभट्टोऽवदत्, ''भवत उपचाराः प्रारब्धा एव । मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् ।'' एतन्निशम्य चकितचकितः सोमशर्मा अपृच्छत्,''षड् वैद्याः?'' अनन्तभट्टः प्रत्युवाच - ''सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामश्चेति । एतेभ्यो महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते । भवत्सदृशा विविधकार्यव्यग्रा जना एतेषु षट्सु वैद्येषु नावधानं ददतीति जानाम्यहम् । अत एव भवान् प्रभाते पद्भ्यामागच्छतु इति मया कथितम् । भवन्तमहं शीतलजले स्नातुं सात्त्विकभोजनं भोक्तुं च प्रेरितवान् । एते सर्वेऽनुभवाः आनन्ददायका इति भवता सूचितमेव । भवानेतान् षड्वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु । एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्? इतोऽपि यदि भवानधिकं साहाय्यमपेक्षते तर्हि सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति''। बद्धाञ्जलिः सोमशर्मा सादरमनन्तभट्टाय अकथयत्, ''सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये।'' ततो वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) उचितं पर्यायं चिनुत । १

१) सिद्धोऽस्मि = ....... + ....... । (सिद्धः + अस्मि / सिद्धः + आस्मि)

२) जानाम्यहम् = ....... + .......। (जानामि + यहम् / जानामि + अहम्)

II) समूहेतरपदं लिखत । १

१) विश्रान्तिः, अनायासः, उपचाराः, विश्रामः

२) सानन्दम्, सहर्षम्, सततम्, सोल्लासम्

III) योग्ये विशेषणे चित्वा लिखत । १

१) ....... अनुभवाः । २) ........ उपचाराः ।

IV) गद्यांशे आगते २ पूर्वकालवाचक - धातुसाधित - ल्यबन्त - अव्यये ....... , ......। १

**३. स्वमतप्रकटनम् ।** २

'अतिकार्यं स्वास्थ्यविनाशकम्' इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

तौ भ्रातरौ लेरसियामहोदयस्य जनपदस्थानं गतौ यतः .............

(लेरसियामहोदयः तौ विज्ञापनपत्रं प्रेषितवान् । / तौ तत्स्थानं द्रष्टुम् इच्छतः । )

II) कः कं वदति । १

तावेव मम मित्रे ।

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

भ्रात्रोः उदारतां वीक्ष्य लेरसियामहोदयः प्रभावितः ।

तथेत्युक्त्वा लेरसिया ताभ्यां भ्रातृभ्यां सह कुटीं गत्वा ताभ्यां सह मोदमानः रात्रिमयापयत्। ताभ्यां साकं रूक्षमन्नमपि तेन सानन्दं भक्षितम् । प्रत्युषसि तेनात्मनः सत्यरूपं प्रकटीकृत्य आत्मपरिचयस्तयोः कारितः । अचिरादेवैषा वार्ता ग्रामे प्रसृता । सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन् । एष महाजनो ग्रामागतोऽपि नास्माभिर्विज्ञातः तेन सह शिष्टसम्मतो वा मानुषो आचारोऽपि न कृतः इति विचारेण ते खिन्ना जाताः । केचन धनिकास्तं जनप्रमुखं स्वगृहं नेतुं तां कुटीमधावन् । परं तौ त्यक्त्वा स नान्यत्र गतः । तावेव मम मित्रे इति सोऽकथयत् । मम परिचयोऽपि नासीत् तयोः परं मम दैन्यावस्थां वीक्ष्यापि ताभ्यां मह्यं सत्कारो प्रतिपादितः । तौ अधनौ किन्तु तयोः मनसी उदारे । एषैव तयोः आत्मिकी सम्पद्। केभ्यश्चिद्दिनेऽभ्योनन्तरं लेरसियाप्रेषितेन विज्ञापनापत्रानुसारं तौ भ्रातरौ तस्य जनपदस्थानं गतौ । तत्र स प्रमुखस्ताभ्यां महत् स्वागतं समर्पयामास । नैकप्रकारान् उपहारान्, नैकान् वृषसदृशान् मिठूनप्राणिनोऽपि ताभ्यामुपायनीकृतवान् येन तौ आढ्यौ सञ्जातौ । इत्थं लेरसिया तयोर्मार्दवं पारितोषिकैः सम्मानितवान् । ततोऽपरान्तं ग्रामवासिजना अपि ताभ्यां सह सादरं व्यवहरन्ति स्म । तैरपि ज्ञातमधुनात्मिक्याः सम्पदः मूल्यं सामर्थ्यं च ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) आचारोऽपि = ....... + ....... । (आचारो + अपि / आचारः + अपि)

२) तेनात्मनः = ....... + ....... । (तेन + आत्मनः / तेना + आत्मनः)

II) समूहेतरपदं लिखत । १

१) लज्जिताः, दुःखिताः, व्रीडिताः । २) सह, साकम्, अलम् ।

III) विशेषण - विशेष्य - अन्वितिः । १
आचारः इति विशेष्यस्य गद्यांशे आगते द्वे विशेषणे लिखत ।

IV) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।**
**यथाक्रमं घटनाः लिखत ।** २

i) द्वौ भ्रातरौ लेरसियामहोदयस्य ग्रामं गतौ ।
ii) लेरसियामहोदयः कुट्यां रात्रिम् अयापयत् ।
iii) धनिकाः लज्जिताः अभवन् ।
iv) लेरसियामहोदयः सत्यरूपं प्रकटीकृतवान् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १
पारम्परिक-ऊर्जासाधनानां उपलब्धिः मर्यादिता यतः .........
(एतत् कृत्रिमतः लभ्यते । / एतत् निसर्गात् लभ्यते ।)

II) कः कं वदति ।
एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । १

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकवायुः प्रभवति ।

श्रेया - पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि। दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तः सम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति । तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । तदेव कृष्णसुवर्णमिति।

पार्थः - तस्योपस्कारार्थं महाप्रयासः आवश्यकः । भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते । तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते । एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः, पवनः, जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । गोमयात्, पर्णावशेषाद्, अवकराच्च जैविकवायुः प्रभवति तथाएरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते । अणुभ्योऽपि ऊर्जा लभ्यते ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १
१) नैसर्गिकवायुश्च - ...... + ...... । २) निसर्गाल्लभ्यते - ...... + ...... ।

II) विलोमशब्दौ चित्वा लिखत । १

१) विनश्य × ...... । २) परिष्कृतम् × ...... ।

III) गद्यांशात् चित्वा द्वे पूर्वकालवाचक - ल्यबन्त - अव्यये लिखत । १

IV) 'साधनानि' इति शब्दस्य द्वे विशेषणे लिखत । १

**३. पृथक्करणम् । जालचित्रं पूरयत ।** २




**द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् । मञ्जूषातः उचितान् शब्दान् चित्वा स्तम्भपूरणं कुरुत ।** २

(सिकताभिः, सेतुबन्धनम्, अध्ययनेन विद्याप्राप्तिः, फलके चित्रलेखनम्, शशस्य विषाणे)

| शक्यम् | अशक्यम् |
|---|---|
| | |

निर्बन्धपृष्टः स च तं शक्रोऽवादीत् द्विजाकृतिः ।
सेतुं बध्नामि गङ्गायां ताराय प्राणिनामिति ॥१॥
ततोऽब्रवीत् तपोदत्तः सेतुः किं मूर्ख बध्यते ।
गङ्गायामोघहार्याभिः सिकताभिः कदाचन ॥२॥
तच्छ्रुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक् ।
यद्येवं वेत्सि तद् विद्यां विना पाठं विना श्रुतम् ॥३॥
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्यतः ।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना ॥४॥

**२. 'शशविषाणेच्छा', 'व्योम्नि चित्रकल्पना' एतयोः पदयोः अर्थं माध्यमभाषया स्पष्टीकुरुत ।** २

**प्र.२. ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) विलोमशब्दौ चिनुत । १

१) दुःखिताः × .............. । २) कदाचित् × .............. ।

II) श्लोके आगते द्वे विशेषणे लिखत । १

सुकृतिनः .............., .............. ।

सदा सद्ग्रन्थानां श्रवणमनने ये विदधते ।
नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः ।
भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां
स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते सुकृतिनः ।।१।।
कदर्थितस्यापि हि धैर्यवृत्ते -
र्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने -
र्नाधः शिखा यान्ति कदाचिदेव ।।२।।

२. **पद्यांशं पठित्वा श्लोकस्य अन्वयं पुनर्लिखत ।** २

कदर्थितस्यापि धैर्यवृत्तेः ........ प्रमार्ष्टुम् ........ शक्यते । अधोमुखस्यापि कृतस्य वह्नेः ........ कदाचिदेव ........ न यान्ति ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) रक्ष .............. भवद्गुणाः ।।

ii) गजाननं .............. पङ्कजम् ।।

iii) वंशभवो .............. महिमानम् ।।

**ड) वृत्तनाम चिनुत ।** १

ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।
ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ।।

अस्य श्लोकस्य वृत्तनाम .................. इति । (उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

## तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

कलानैपुण्यार्थं शास्त्राध्ययनं कर्तव्यम् ।

II) एकपदेन उत्तरं लिखत । १

चित्रस्य महत्त्वपूर्णम् अङ्गं किम् ?

चित्रसूत्रविवरणसमये मार्कण्डेयमुनिना आयामोच्छ्रायमानवर्णनं कृतम् । चित्रे स्त्रीपुरुषयोः दैर्घ्यम्, उद्गतता तथा च शरीरस्य अङ्गप्रत्यङ्गम् इत्येतेषां चित्रसूत्रम् इति संज्ञा । इदं सर्वं प्रमाणितं भवेत् । यतो हि परिमाणेन विना चित्रमाकर्षकं न भवति । अपि च काव्यशास्त्रे ये शृङ्गारवीर-करुणादयः नवरसाः वर्णिताः ते एव चित्रे प्रकटिताः भवेयुः । रसानां चित्रणं चित्रे चैतन्यं निर्माति । अङ्गविभङ्गैः हृदयस्य भावाः प्रकटिताः भवन्ति । भावानां चित्रणं नवरसानुकूलं कर्तव्यम् । भावयुक्तं चित्रं प्रभावकारि भवति । चित्रे भावानां रसानां च चित्रणं कथं विधेयमिति ज्ञापयितुं चित्रलक्षणानि कथितानि । व्यक्तिप्रकृतिमनुसृत्यापि

चित्रं कथमारेखनीयमिति सङ्केताः वर्णिताः विद्यन्ते । यथा शान्तप्रकृतिमनुजस्य चित्रणसमये भ्रूः अर्धचन्द्राकारा भवेत्। नर्तकस्य भ्रूः धनुराकारा भवेत् । देवतानां चित्रं भूषणैरलङ्कृतं प्रसन्नमुखं धृतक्षौमं चालिखेत् । ऋषिचित्रणं जटाजूटयुक्तं कृष्णाजिनधारि दुर्बलं तेजोयुक्तं चावश्यकम् । चित्रस्य महत्त्वपूर्णमङ्गं लावण्यम् । चित्रकारेण अङ्गप्रत्यङ्गस्य प्रमाणं ज्ञात्वा कस्मिन् अङ्गे क्षयः आवश्यकः कस्मिन् अङ्गे वृद्धिरनिवार्या इति चिन्तनीयम् । इत्थं चित्रकारनैपुण्यार्थं यद् यदावश्यकं तत्सर्वमार्गदर्शनं श्रीविष्णुधर्मोत्तरपुराणे कृतं विद्यते । वस्तुतः तु कला ईश्वरदत्ता । परं तस्यां नैपुण्यप्राप्तिः मानवाधीना एव । तदर्थमेव शास्त्राणां प्रयोजनं शास्त्राध्ययनस्य उपयुक्तत्वं विद्यते ।

२. **पृथक्करणम् ।** २




## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

आसीत् अङ्गुलिमालः नाम कश्चित् कुख्यातः चोरः । ....... अरण्ये स निवसति स्म । पथिकान् लुण्ठयित्वा तेषां अङ्गुलीश्च कर्तयति स्म। तासां मालां कृत्वा कण्ठे धृता तेन तस्मात् तस्य नाम अङ्गुलिमाल इति। ....... सहस्रं धारयिष्यामि इति तेन प्रतिज्ञा कृता। कथमपि स ग्रहीतव्यः एतदर्थं राजा प्रयत्नशीलः आसीत्। राज्ञः एते प्रयासाः ....... निवेदयितुं तस्य माता अरण्यम् आगच्छत्। प्रतिज्ञापूर्तये ....... अङ्गुलेः आवश्यकता आसीत्। तदर्थं स मातरमेव अङ्गुलिकर्तनार्थम् अतर्जयत्। यावदेवासौ अङ्गुलिं कर्तयति ....... प्राप्तस्तत्र भगवान् बुद्धः। स भगवान् अङ्गुलिमालं एकं पर्णं अयाचत। अङ्गुलिमालः वृक्षस्य पर्णं छित्वा भगवते अयच्छत् ।

(पुत्राय, गहने, तावत्, अङ्गुलीनां, एकस्या)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. ग्रीष्मवर्णनम् । २. सङ्गणकः । ३. गणेशोत्सवः।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) On 5th sep. teacher's day is celebrated.

ii) A cat likes milk.

iii) Peacock-feather looks beautiful on the head of Lord Krishna.
iv) Clouds rain.
v) Rainbow is seen in the sky in monsoon.
vi) The main job of the news reporter is to collect the news.
vii) When will you go to a village?
viii) Tell the story of cunning jackal.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) धातु स्पृह् (१० उ.प.) २) धातु वि + तॄ (१ प.प.)
३) धातु अनु + सृ (१ प.प.) ४) धातु वि + रम् (१ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) समुद्रस्य निकषा मम गृहं वर्तते ।
२) शङ्करस्य साकं पार्वती तिष्ठति ।
३) प्रकाशस्य विना कार्यं न शक्यम् ।
४) पर्वतं समीपं वृक्षाः सन्ति ।

## पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३
**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| प्र + आप् ५ प.प. | .......... | प्राप | प्राप्नोति | ........ | ........ | ........ |
| भू १ प.प. | भविष्यति | .......... | ........ | ........ | ........ | स्यात् |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| द्वितीया | राजानम् | ...... | ...... |
| चतुर्थी | ...... | दिग्भ्याम् | ...... |
| षष्ठी | भवतः | ...... | ...... |
| पञ्चमी | ....... | ....... | अस्मत् |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(निवर्तमानः, स्मरन्, अभिनेतव्या, ज्ञातम्, कृतवान्, लिप्ता, समुपागतवति, भोज्यम्)

**ड) समासाः ।**

**समस्तपदानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समस्तपदम् | समासनामानि |
|---|---|---|
| i) | हसनक्षितीशः | द्वितीया तत्पुरुष समास |
| ii) | गुणातीतम् | पञ्चमी तत्पुरुष समास |
| iii) | विपक्षेषु | बहुव्रीहि समास |
| iv) | इतरेतरम् | उपपद तत्पुरुष समास |
| v) | यथेष्टम् | कर्मधारय समास |
| vi) | लेरसियानामा | प्रादि तत्पुरुष समास |
| vii) | नृत्यगीतवादनैः | अव्ययीभाव समास |
| viii) | दूरवर्तिनम् | इतरेतर द्वन्द्व समास |

**ढ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) वैद्यस्य पत्न्या सात्त्विकः अल्पः प्रातराशः परिवेषितः । (प्रयोगं परिवर्तयत ।)

ii) नष्टे कारणे कुतः कार्योत्पत्ति ? (यदि-तर्हि उपयुज्य वाक्यं पुनर्लिखत ।)

iii) भवती नाट्यशास्त्रं जानाति । ('त्वम्' उपयुज्य वाक्यं पुनर्लिखित ।)

iv) छात्रः काव्यं पठति । (शिक्षिका) (प्रयोजकरचनां कुरुत ।)

**ण) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) सप्ताहस्य ............ अहं मन्दिरं गच्छामि । (thrice)

ii) श्रावणमासे ................. तिथौ कृष्णजन्म भवति । ($8^{th}$)

iii) .............. मित्रयोः न्यायशास्त्रं प्रियमासीत् । (2)

iv) ............... प्रमुखाः दिशः सन्ति । (4)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

निदाघसमये मध्याह्ने एकः पथिकः मार्गेण गच्छति स्म। मार्गम् उभयतः आम्रवृक्षाः सन्ति। तत्र स खगानां कलरवं श्रुणोति। वृक्षच्छायायाम् उपविश्य श्रान्तः स आम्रफलानि भक्षयति। संतुष्टः भूत्वा स वृक्षान् प्रशंसति, 'धन्याः ते महीरुहाः छायापत्रसमान्विताः येभ्यः निराशाः न यान्ति पान्थस्थाः। पथिकः मनसि सङ्कल्पं करोति, 'अहमपि स्वगृहे वृक्षान् आरोपयिष्यामि।'

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

१) कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥

२) शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरो स च पण्डितः॥

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

| | | |
|---|---|---|
| दरिद्रः | – | दिवंगतस्य शिवस्य अलङ्कारा: चन्द्रः गङ्गा सर्पराजः वासुकिः आकाशेन नीताः। |
| राजा | – | ततः परम्। |
| दरिद्रः | – | ततः परमासन् तस्य गुणाः। तान् अन्ये विभज्य अनयन्। |
| राजा | – | के? |
| दरिद्रः | – | दानशीलतां उदारतां वीरतां च भवान् अनयत्। अन्ते अवशिष्ट एकः एव गुणः तमेव गृहीत्वा अहं भूलोके भ्रमामि। भिक्षाटनं करोमि सदा। |

**Best of Luck**